क्विप्। प्रत्युत्पन्नसतौ स्त्रियां स्त्री। तस्याः अपत्यम् कल्याण्यादि० ढक् इनङ् च। आनुसृष्टिनेयः तदपत्ये पु०स्त्री०।

**अनुसेविन्** त्रि० अनुक्षणं सेवते अनु+सेव–णिनि स्त्रियां ङीप्। सततसेविनि "क्रूरकर्मानुसेविनीमिति" रामा०।

**अनुस्तरण** त्रि०अनुस्तीर्य्यते अनु+स्तॄ–करणे ल्युट्। आच्छादने चर्म्मादौ स्त्रियां ङीप्। "अनुस्तरण्या वपामुत्खिद्य शिरोमुखं प्रच्छादयेदिति" ता०ब्रा०। तत्साधने स्त्रीगव्यां स्त्री। "अनुस्तरणीं गामजां वैकवर्णां कृष्णामेके सव्ये वाहौ बद्ध्वेति" श्रुतिः। "सेयं गौः स्तृतं दीक्षितमनुस्तृतत्वाद्धिंसितत्वाच्चानुस्तरणीत्युच्यते" इति तच्चिरन्तनब्राह्मणम्। अनुतीर्य्यते वैतरणी नदी अनया अनु+तॄ–करणे ल्युट् पृ० सुट्। वैतरणीनद्युत्तारिकायां गवि स्त्री। "तस्मात् पुरुषाय पुरुषानुस्तरणी क्रियते इति" श्रुतिः।

**अनुस्मृति** स्त्री अनु+स्मृ–क्तिन्। अनुरूपचिन्तने आलम्बनसङ्गतया चिन्तने "अनुस्मृतेर्वादरिरिति" शा०सू०। प्रादेशमात्रत्वेन अयम् (परमेश्वरः) अप्रादेशमात्रोऽप्यनुस्मरणीयः प्रादेशमात्रप्रत्ययवत्त्वाय। एवमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति वादरिराचार्य्योमन्यते इति भा०। "प्रादेशमात्रोऽह्यपरोऽपि दृष्ट इत्यादौ श्रुतौ प्रादेशमात्रश्रवणमनुस्मृत्यर्थमित्यत्र तत्तात्पर्य्यम्।

**अनुस्यूत** त्रि० अनु+सिव–क्त ऊट्। ग्रथिते, सततसंबन्धे च। "स्रक्सूत्रवत् सर्व्वानुस्यूतेति" ति०त०रघुनन्दनः।

**अनुसमाहार** पु० अनु+सम्+आ+हृ–घञ्। अनुसन्धाने "अनुसमाहरतीत्यस्यानुसन्धत्ते" इति भाष्ये व्याख्यानात्तथात्त्वम्।

**अनुस्वार** पु०स्वृ–अप् उदात्तादिस्वरवत्त्वात् स्वराः स्वरवर्णा एव स्वाराः अनुगतः स्वारान् अत्या० स०। स्वराश्रयेण उच्चार्य्यमाणे विन्दुरेखया व्यज्यमानेऽनुनासिके वर्णभेदे। "अनुस्वारो विसर्गश्चे"त्युपक्रम्य "आश्रयस्थानभागिन" इत्युक्तेस्तस्य तथात्वम्। सानुस्वारो विसर्गी च दीर्घश्चैव गुरुर्भवेत् छन्दोम०। "अनुस्वारो विसर्गश्च +क ँपौ चापि पराश्रितौ। अयोगवाहा विज्ञेया आश्रयस्थानभागिन" इति शिक्षा।

**अनुहरण** न० अनु+हृ–ल्युट्। देशभाषाचेष्टादिना सदृशीकरणे, सादृश्यधर्म्माविष्करणे च।

**अनुहार** पु० अनु+हृ–घञ्। अनुकरणे पश्चाद्धरणे च।

**अनुहार्य्य** त्रि० अनु+हृ–ण्यत्। सदृशीकार्य्ये।

**अनुहृत** त्रि० अनु+हृ–क्त। अनुकृते सदृशीकृते।

**अनुहोड** त्रि० होडे विभक्त्य० अव्ययी०। होडे इत्यर्थे। तत्र भवादौ ठक् अनुशतिका० द्विपदवृद्धिः। आनुहौडिकः। होडभवे त्रि०।

**अनूक** पु० अनु+उच–समवाये क नि० कुत्वम्। गतजन्मनि। सुशीले न०। वङ्क्राधारे पृष्ठास्थिभेदे पु०। यत्र शीर्ष्णोऽवद्यति नांसयोर्नानूकस्य नापरसक्थयोरिति" शत० ३,८,३,२७, भाष्यकृता तथैव व्याख्यातम्। चयनसाधने यज्ञिये इष्टकोपधायकपात्रभेदे न०। "अयुग्मागणमध्यमानूके" इति कात्या० १६,७,२२। अयुग्मो य इष्टकागणः तासां मध्यमाऽनूके उपधेया इति। "एका च" कात्या० १६,७,२३। याचैकेष्टका साप्यनूक एव। "अभितो युग्माः २४, अनूकमभितो युग्मा अर्द्धार्द्धिकया इति तद्व्या०। "साध्यमनूकं वक्त्रादिति" इहत्सं हितोक्ते पुरुषलक्षणभेदे न०।

**अनूकाश** पु० अनु+काश–घञ् उप० दीर्घः। अधस्तनदेहादिप्रकाशे "प्रकाशेनान्तरमनूकाशेन वाह्यमिति" य० २५,२ "अनूकाशेनाधस्तनदेहकान्त्येति" वेददीपः।

**अनूचान** पु० अनु+वच–कान नि०। शिक्षादिषड़ङ्गसहितवेदाध्ययनकारिणि, वेदार्थानुवचनसमर्थे च। "इदमूचुरनूचानाः प्रीतिकण्टकितत्वच" इति कुमा० "स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्व्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय" छा० उप०। "बालाकिर्ह्यनूचानमना आसेति" छा० उ०।

**अनूच्य** त्रि० अनूच्यते अनु+वच–क्यप्। अनुवाच्ये पाठ्ये "पश्चादरण्योऽनूच्यमिति" "विमुखेनारण्येऽनूच्यमिति" च का० १८,४२०,२४।

**अनूढ** त्रि० अनु+वह–क्त। अविवाहिते। "परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहा"दित्यमरः। स्त्रियां ङीप्।

**अनूति** स्त्री वे–क्तिन् अभावे न०त०। गमनाभावे। "अस्तूती अनूती हिरिशिप्रःसत्वा" इति ऋ० ६,२९,६। "अनत्या अनागमनेनेति" भा०।

**अनूदित** त्रि० अनु+वद–क्त। यस्य तुल्यार्थकभाषान्तरेणानुवादः कृतः, तस्मिन् पदार्थे अनुवादविषये च।

**अनूद्य** अव्य० अनु+वद–ल्यप्। अनुवादं कृत्वेत्यर्थे। अनु+वद–क्यप्। अनूद्ये अनुवादार्हे।

**अनून** त्रि०न ऊनः न०त०। परिपूर्णे, समग्रे, अहीने च। "अनूनराजस्य गुणैरनूनामिति" रघुः। नूनं निश्चितं न० त०। अनिश्चिते। स्वार्थे कन् तत्रैवार्थे।